श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

कण्डुमुनि विरचितम्

# ॥ श्री ब्रह्मपारस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री ब्रह्मपारस्तोत्रम् ॥

प्रचेतस ऊचुः
ब्रह्मपारं मुनेः श्रोतुमिच्छामः परमं स्तवम्।
जपता कण्डुना देवो येनाराध्यत केशवः ॥ 1 ॥

सोम उवाच
पारं परं विष्णुरपारपारः
    परः परेभ्यः परमार्थरूपी।
स ब्रह्मपारः परपारभूतः
    परः पराणामपि पारपारः ॥ 2 ॥

स कारणं कारणतस्ततोऽपि
    तस्यापि हेतुः परहेतुहेतुः।
कार्येषु चैवं सह कर्मकर्तृ -
    रूपैरशेषैरवतीह सर्वम् ॥ 3 ॥

ब्रह्म प्रभुर्ब्रह्म स सर्वभूतो
    ब्रह्म प्रजानां पतिरच्युतोऽसौ।
ब्रह्माव्ययं नित्यमजं स विष्णु
    रपक्षयाद्यैरखिलैरसङ्गि ॥ 4 ॥

ब्रह्माक्षरमजं नित्यं यथाऽसौ पुरुषोत्तमः।
तथा रागादयो दोषाः प्रयान्तु प्रशमं मम ॥ 5 ॥

एतद्ब्रह्मपराख्यं वै संस्तवं परमं जपन्।
अवाप परमां सिद्धिं स तमाराध्य केशवम्॥ 6॥

इमं स्तवं यः पठति शृणुयाद्वापि नित्यशः।
स कामदोषैरखिलैर्मुक्तः प्राप्नोति वाञ्छितम्॥ 7॥

॥ श्री ब्रह्मपारस्तोत्रं समाप्तम्॥